# राजस्थानीयेषु आधुनिकसंस्कृतमहाकाव्येषु रामदेव चरितम् महाकाव्यम्

डॉ. योगेश कुमार

वर्तमान संस्कृत-साहित्य-सर्जनायां निरतेषु जयपत्तनीयविद्वांन मम् धीमान् शिष्य: रामदेव साहू: अपि स्वकीयं उत्कृष्टं स्थानम् आदत्ते। एतेन भूरि परिश्रमं विधाय संस्कृतभाषाया: पारम्परिकविधासु, अपिच नूतनासु विधासु रचनाकार्यं विहितम्। एतदीय रचनाकार्ये रामदेवचरितम्, चित्तौडचूडामणि:, कश्मीरगौरवम् चेति त्रीणि महाकाव्यानि, नवजयपुरम् इति खण्डकाव्यम्, रुक्मिणीहरणम् इति चम्पूकाव्यं, साहित्यकाण्ठाभरणम् इति साहित्यशास्त्रीय: लक्षणग्रन्थश्च प्रायेण चर्चितानि सन्ति। आसु रचनासु रामदेवचरितम् महाकाव्यम् मया सम्यगालोकितम्। श्री साहू विरचितम् महाकाव्यं राजस्थानस्य लोकदेवतां रामदेवम् लक्ष्मीकृत्य तज्जीवनचरित्रवर्णनव्याजेन विरचितम् अस्ति। यद्यपि महाकाव्येऽस्मिन् पर्याप्ता साहित्यिकता वरीवर्त्ति तथापि मद्विचारेण अस्य महाकाव्यस्य इतिवृत्तं वस्तुत: मध्यकालिकं राजस्थानीयं ऐतिह्यम् अवलम्ब्य तिष्ठति अत: इदं महाकाव्यं राजस्थानीय-ऐतिहासिक-संस्कृत महाकाव्येषु स्थानं लभते। दिल्लीनरेशस्य अनङ्गपालस्य राजकुलमस्यैतिह्यस्यमूलमास्ति। इतिहास प्रसिद्धस्य राजपूतकालस्य अन्तिम-चरणे राजस्थानीयानां राज्ञां स्थितिं वर्णयित्वा यथा कालिदासीयरघुवंशे रघूणामन्वयं वक्ष्यमाणमस्ति तद्वत् अत्रत्यराज्ञामपि त्यागमयी तपोवनप्रियां प्रवृत्तिमत्र कवि: वर्णयति।

नायिकाया: वर्णनस्य पृष्ठभूमौ स्त्रिय: आदर्शा: राजस्थानीय - संस्कृत्यानुकुलं निदर्शिता: सन्ति। पातिव्रत्यस्य आदर्शमालम्ब्य अनङ्गपालस्य धर्मपत्नी वने कष्टान् सोढ्वापि प्रचरति तत्र करुणस्य काचिदपूर्वेवच्छाया प्रतिभाति। वनभूमौ बाह्यप्रकृतिं चित्रीकुर्वन् कवि: अत्र आत्मन: अपि प्रकृते: साहचर्ये सूक्ष्मा सहृदयभावनाम् उपस्थापयति यथा-

**आत्मानेषु प्रतिकृतिमहो निम्बवृक्षस्थ काकाः,**
**बिम्बादर्शेष्विव नु कुहुचिद् दृश्यमाणा विशेषाः।**
**लोकं लोकं विविधविधिभिश्चेष्टितैः शब्दयन्तः,**
**वृक्षश्रृङ्गेष्वपि च परितश्चक्रमैरुत्पतन्ति॥**

प्रकृतिवर्णनस्याङ्गभूते प्रात:कालवर्णने कवित्वेन सह व्यञ्जनाशक्ते: प्राचुसर्यस्यापि निदर्शनं भवति। तच्च सहजमेव परम्परागतमहाकाव्यकाराणां प्रकृतिवर्यवेक्षणक्षमतां स्मारयति नूनं। यथा अधोलिखितश्लोके -

**अस्मिन्काले रविरपि पुरो वीक्ष्य रुद्धो निशेशं,**
**मन्देहैर्यो दिवि रणरतो भारतं शङ्कमानः।**
**भूमौ भीष्मं क्षितिजविदिशा भीममन्य शिखण्डिं,**
**किञ्चित्स्तब्धोऽभवदनवधिः प्राणिनां किं नु चित्रं॥**

अस्मिन् महाकाव्ये कविः अन्तःप्रकृतिं चित्रीकुर्वन् भावसूक्ष्मतामपि उपस्थितयाति मानवमनोभावानां वर्णनेऽपि कविहृदयस्य संवेदनापूर्णा गतिशीलता प्रतिभाति। महाकाव्यस्य द्वितीयसर्गे नृपदम्पत्योः वार्तालापप्रसंगे अस्या एकम् उदाहरणम् एवं प्रकारेण उद्धर्तुं शक्यते -

**भस्मीकृतो भगवता भवता रतीशः, ईश ! क्षितीश इह नामगतैक्यतस्ते।**
**ईर्ष्याद्दगन्धतनुता तनुतामगम्यात्, कोपाश्रयत्वमनुगामिनि वा कथञ्चित्॥**

यद्यपि महाकाव्येऽत्र वर्ण्यविषयगतं वैविध्यम् आत्मनि आवर्ज्य उपस्थितोऽस्ति। महाकाव्ये अङ्गीरसः श्रृंगारः पर्याप्तपुष्टो वर्तते। विभावनुभावव्यभिचारिभीः पुष्टस्य रसस्य उपस्थापने कविनाऽत्र परम्पराया अनुसरणं कृतम्। तत्र कृतम् विश्रृङखलता अथवा न्यूनतायाः न किमपि स्थानं वरीवर्त्ति। यथा -

**देवाङ्गना दिगिभलक्ष्मविभाच्छलेन, यन्मङगलाय वदनेषु मृदुत्वमुद्राम्।**
**जग्मुर्नवाऽद्य दरदन्तद्युतिस्मितेषु, ता एवतत्र वचनेषु विशेषभावम्॥**

अङ्गभूतानामन्येषां रसानां वर्णनेऽपि अभिरुचिं दर्शयति। तत्र न केवलं रसवर्णने अपितु रसनिष्ठ स्थायिभवस्य तत्तद्गुणानां च समावेशोऽपि कविना कृतः। अत्र इदमुल्लेखनीयं वर्तते यद् अस्मिन् कस्मिन्नपि श्लोके रसद्वयस्य व्याभिचारो भावस्य भावान्तरेण संकरस्य भावशबलतादि रसवदलङकाराणां वा स्थानं नास्ति। अङ्गभूतस्य वीररसस्य वर्णने स्थायिनः परिपोषो विशेषतः एवं प्रकारेण वर्णनीयोऽस्ति -

**एकैकमन्तरितभागमथावलोक्य, प्रत्येकतो द्रुततमां गतिमन्वगच्छत्।**
**क्रुद्धो जगाम जगदब्धितटापरंतं, क्षुब्धं जलं जलनिधेस्तटतामिवेत्थम्॥**

रामदेवचरितमहाकाव्ये यद्यपि वैदर्भी रीतिरेव कविना समाचरिताऽस्ति तथापि शब्दविन्यासे क्वचित् अलङाकराणा सन्निवेशे कृत्रिमतायाः समाचरणात् किलष्टताऽपि समायाता। यथा मध्येन्द्र नीलमणिमण्डितयष्टिकाङ्क वातायनादि, अध्यासितासितविभावलयाधिदीप्र चन्द्रप्रभैव इत्यादि पदेषु दीर्धसमास तथा काठिन्यं तु वर्तते एवं अनेन यष्टिकाङ्क द्रीप इत्यादि पदेषु परुषावृत्तिवर्णानां प्रयोगात् क्लिष्टताऽपि वर्तते। क्वचित् तु पदशय्यायां प्राञ्जलताऽपि अस्ति अतः यत्रकुत्रचित् हृदयावर्जकाः श्लोकाः अपि कविवाण्या प्रस्फुटिताः। यथा -

**द्वीपं द्विपाधिपतिवाह इव प्रशासन्, प्राशंसि जम्बुकरदैः करुणाकरोऽयम्।**
**विश्रान्तिधाम महतां गुणसन्ततीनां, संसारसन्ततिरपारयशोऽम्बुवाहः॥**

काव्यगुणानां समावेशादृष्ट्याऽपि रामदेवचरितमहाकाव्यं उल्लेखनीयमस्ति। यतो हि माधुर्यस्य

ललितोचितसन्निवेशे कविः अत्र पर्याप्तं सफलो बभूव इति सुतरां वक्तुं पार्यते। क्वचित् प्रसादगुणस्य प्राञ्जलताऽपि वर्तते। ओजसः वर्णनं न्यूनतरम् अस्ति। महाकाव्यस्य श्रृङ्गारप्रधानकलेवरमयत्वात् कवेरेतादृशी प्रवृत्तिः सहजा चकास्ति। अत्र माधुर्यस्य एकः श्लोकः उदाह्रियते -

**मतङ्गजानां मदवारिभिर्या, निषिञ्चिता तुङ्गतया द्रुमालिः।**
**विभाति सा भूधरश्रृङ्गलग्ना, शिरः प्रसूनावलिशेखरेह॥**

अत्र न केवलं माधुर्यम् अपितु प्रसादस्यापि समावेशो वर्तते। माधुर्योचितस्य अनुप्रसालंकारस्य ललितावृत्तिगतानां वर्णानां प्रयोगस्य यादृशी चारुताऽस्ति तादृशी एव प्रसादोचिता वर्ण विन्यासे दीर्धसमासा संघटनाऽविकवेः रसवर्णनपाटवमभिव्यनक्ति यथा एकादशसर्गस्य अधोलिखितश्लोके -

**चण्डादुच्चण्डं योऽट्टहासं प्रकुर्वन्, ब्रह्माण्डाण्डञ्चाखण्डलैरावतेव।**
**कुर्वन् काण्डेऽस्मिन् खण्डयन् खण्डखण्डं, तीक्ष्णां तृष्णां किं चेतसा चीयते न॥**

रामदेवचरितमहाकाव्ये ध्वनिकाव्यानामुदाहरणान्यपि सुतराम् अन्वेष्टुं शक्यानि सन्ति। यथा एकं पद्यम् उदाहरामि -

**रत्नाकरे च यदि नाथ सति स्वनाथे, धेयान्न युक्तमुत काचमयीं विभूषाम्।**
**ध्यायाम्यतश्चिरमहं चरणौ त्वदीयौ, एकाग्रचित्तविषयौ विषवृक्षहारिन्॥**

अत्र स्वनाथ इति सम्बोधने रत्नाकरस्य गर्वातिशयात् काचमयत्वेऽपि काञ्चनवत् विभूषणस्य आधाने अमवृत्त्याः मूर्खजनस्य न तादृशागुणाधायकत्वमिति विधिकथनेऽपि प्रतिषेधरुपस्यार्थस्य ध्वनिः निहिताऽस्ति। विषवृक्षहारिन् इत्यस्मिन् सम्बोधनेऽपि निष्ठातिरेको ध्वन्यमानः सन् भक्तिरसस्य उत्कर्षं व्यनक्ति एवम् एतादृशानि पद्यानि ध्वनिकाव्यदृष्ट्या उत्तमकाव्यस्य उदाहरणानि सन्ति इति रक्तुं शक्यते।

रामदेवचरिते अलङ्कारविन्यासो उपस्थापयितुं कृतोऽस्ति। यथा 'वेधाऽपि द्वेधाऽत्र विधाय लोके', भूपालमौलिमणिमन्दिर मिन्दु मौलेः, समित्सु दीप्तासु नृपं समुत्सुकम् इत्यादिपद्येषु दर्शनीयम् अस्ति। कविना अर्थालङ्कराणां प्रयोगोऽपि पर्याप्तं पाण्डित्यं दर्शितं यथा -

**उद्गत्वरे भानुविभेव सैव, दीप्तिं जगामावनिपास्य देशे।**
**उपास्यती वा जयशल्वमेरोः, विलासकाले दयितुः श्रवाय॥**

अत्र उपमालङ्कारस्य विच्छित्तिः अपूर्ववास्ति। षष्ठसर्गे यमकालंकारस्य श्लेषालंकारस्य च युगपच्छटा वर्तते। यथैकमुदाहरणम् श्रव्यमस्ति -

**तत्वतस्तु दिविषत्कुलं पुरा, जानकीशदिशि कीशकोऽपि सन्।**
**मानवीं हि गतवान् यथैषकः, सम्प्रतीह किमु जानते न वीम्॥**

एवमलंकृतकाव्यसौन्दर्यस्य दर्शनं महाकाव्येऽस्मिन् दृश्यते। रामदेवचरिते वस्तुतः मानवीय व्यक्तित्वानां चित्रणं आदर्शाणां - प्रबोधनं च वरीवर्ति। अत्र यद्यपि काव्यवस्तुत्वेन समकालिकचरित्रम् गृहीतं तथापि कवि

– चरित्रपक्षेण पर्याप्तं प्रभावितो दृश्यते। अत्र प्रस्तुतं याथार्थ्यं कल्पनामिश्रितमस्ति। विश्लेषणात्मक चरित्रस्य परिशीलनत्वात् महाकाव्यरुपेण रामदेवचरितस्य प्रतिष्ठापना वस्तुतः युगीनतायाः सफलान्वितिम् आलम्बते। कवेः मानवस्य स्वजीवितं प्रति उत्तमा रुचिरत्र एतत् शास्त्रीयं सत्यं प्रकटयति यत् साहित्यस्य उन्नयनाय वर्तमानेऽपि उत्तमानि जीवनमूल्यानि रक्षणीयानि।

अस्य महाकाव्यस्य साहित्यिकं महत्वं प्रतिपादयता रामदेवविलास महाकाव्यस्य कर्त्रा पं.रामविलासशर्ममहोदयेन कथितम्–

**काव्यं सुष्ठु विराजते ह्यविकलं भाग्यं न गर्हास्पदं,**
**सुस्वादूत्तमभाव रञ्जितमहो श्रीरामदेवाभिधम्।**
**साहो! त्वं वयसाऽसि सम्प्रति नवो भूयस्तनीयान् परं,**
**श्लाघ्या ते रचना ललामवचसा सिद्धा च वृद्धप्रिया ॥**
**अस्मत्काव्य कलाविलाससुषमालोको बहुव्यापकः,**
**तत्र स्याद्यदि मुद्रणस्य गरिमा किं स्वर्गसौख्यं पुनः।**
**एतट्टंकितकाव्यनीरजरजोनिर्व्याजपाने परं,**
**चेतः षट्पद इत्थमत्र विमुखोऽकारि त्वया साधुना॥**
**पूर्वजानां यशः क्षेत्रे महाराष्ट्रे विशेषतः।**
**निर्मितानि काव्यानि बहूनि कविभिर्धिया॥**
**शिवोभिधो महाराष्ट्रे ह्यभवद्वीरकेसरी।**
**पुरस्कृत्य च तं काव्यनिचया रचिताः कति॥**
**लोकवन्द्यो मरुत्सङ्घे रामदेवः प्रभुः कलौ।**
**उपेक्षितस्त्वयाऽकारि नायकः काव्यप्राङ्गणे॥**
**अतस्तुभ्यं धन्यवादा दातुं सहस्त्रशः।**
**विलासो रसविद्भृङ्गः काव्यशीधु विमूर्च्छितः॥**

*निदेशक*
*विश्वगुरुदीप आश्रम शोध संस्थान, जयपुर*